‘प्रतिष्ठाशब्दसंसिद्धिः प्रतिपूर्व्वाच्च तिष्ठतेः ।
बह्वर्थत्वान्निपातानां संस्कारादौ प्रतेः स्थितिः ॥
अर्थद्वयमेतस्य गीयते शाब्दिकैर्जनैः ।
विशेषसन्निधिर्या तु क्रियते व्यापकस्य तु ॥
सम्मूर्त्तौ भावनामन्त्रैः प्रतिष्ठा साभिधीयते ॥’*॥
स्वभस्मना गोमयभस्मना ।
‘अष्टोत्तरं पलशतं स्नाने देयञ्च सर्व्वदा ॥’
पलमाह मनुः ।
‘पञ्चकृष्णलको माषस्ते सुवर्णस्तु षोडश ।’
पलं सुवर्णाश्चत्वारः । तेनाष्टरक्तिकाधिकलौकिकमाषद्वयाधिकतोलकत्रयेण पलं भवति एवंविधाष्टोत्तरपलशतेन लौकिकषष्ट्यधिकशतत्रयतोलका इति । एवं वल्मीकमृदादिक्षालने गायत्र्या वल्मीकमृदा स्नापयेत् । तत्रापि अष्टोत्तरशतपलं मूलपाणिलिखितन्यायात् । गायत्र्या मूलमन्त्रेण वा गन्धोदकस्नाने शुद्धवत्या एतोन्विन्द्रमित्यादि ऋक्त्रयात्मिकया देशिको गुरुर्यजमानो वा विप्रः नमोऽस्तु इत्यादिमन्त्रौ देवतान्तरे च तत्तद्देवतानामोहः । शिवलिङ्गस्याप्यशैलत्वात् स्त्रीलिङ्गमविरुद्धम् ॥*॥ यमः ।
‘कृत्वा देवकुलं सर्व्वं प्रतिष्ठाप्य च देवताम् ।
विधाय विविधं चित्रं तल्लोकं विन्दते ध्रुवम् ॥’
नारसिंहे ।
‘प्रतिमां लक्षणोपेतां नरसिंहस्य कारयेत् ।
सर्व्वपापानि सन्त्यज्य स तु विष्णुपुरं व्रजेत् ॥
प्रतिष्ठां नरसिंहस्य यः करोति यथाविधि ।
निष्कामो नरशार्द्दूल ! देहबन्धात् प्रमुच्यते ।
सकामो नरसिंहस्य पुरं प्राप्य प्रमोदते ॥
विधिवत् स्थापयेद्यस्तु कारयित्वा जनार्द्दनम् ।
न जातु निर्गमस्तस्य विष्णुलोकात् कथञ्चन ॥’
माधवमानसोल्लासे ।
‘देवस्य प्रमितायास्तु यावन्तः परमाणवः ।
तावद्वर्षसहस्राणि स्वर्गलोके महीयते ॥’
राजमार्त्तण्डे ।
‘पुत्त्रोत्पत्तौ सदा श्राद्धमन्नप्राशनिके तथा ।
चूड़ाकार्य्ये व्रते चैव नाम्नि पुंसवनेऽपि च ॥
पाणिग्रहे प्रतिष्ठायां प्रवेशे नववेश्मनः ।
एतद्वृद्धिकरं नाम गृहस्थस्य विधीयते ॥’
सूत उवाच ।
‘कलौ चैकाहसाध्येन प्रतिष्ठा मन्त्रवित्तवान् ।
मध्यमेनाधमेनापि प्रकुर्य्यात्तान्त्रिकैर्मतैः ॥’
तथा ।
‘नित्यं निर्व्वर्त्य मतिमान् कुर्य्यादभ्युदयं ततः ।
विप्रान् संपूजयित्वाथ ततो यागपुरं व्रजेत् ॥
गणेशग्रहदिक्पालान् प्रतिकुम्भेषु पूजयेत् ।
स्थण्डिले विधिवद्विष्णुं परिवारगणं यजेत् ॥
स्नापयेत् प्रथमं देवं तोयैः पञ्चविधैरपि ।
पञ्चामृतैः पञ्चगव्यैः पञ्चमृत्तिकैरपि ॥
तिलतैलैश्च संस्वेदैः कषायैरपि सत्तमाः ।
पञ्चपुष्पोदकैर्वाथ त्रिपत्रैरपि सत्तमाः ॥
तुलसीकुन्दमालूरपत्रत्रयाद्भुक्षिपञ्चकम् ।
चम्पकाम्रशमीपद्मकरवीरञ्च पञ्चमम् ॥
मृत्तिका करिदन्तस्य पर्व्वताश्वखुरस्य च ।
कुशवल्मीकसम्भूतं मृदां पञ्चकमीरितम् ॥*॥
गोमूत्रं गोमयं क्षीरं दधि सर्पिः कुशोदकम् ।
कुर्य्यात् प्राणप्रतिष्ठाञ्च होमं कुर्य्याद्यथाविधि ।
दक्षिणां विधिवद्दद्यात् पूर्णार्थं तदनन्तरम् ॥’
इति भविष्यपुराणे तृतीयभागे ९ अध्यायः ॥*॥
‘चतुरङ्गुलविस्तारा दीर्घा हस्तद्वयावधि ।
पताका लोकपालानां दशानां परिकीर्त्तिताः ।
पञ्चहस्ताश्च वै दण्डाः पताकानां प्रकीर्त्तिताः ॥’
ज्योतिषे ।
‘दुग्धं सशर्करञ्चैव घृतं दधि तथा मधु ।
पञ्चामृतमिदं प्रोक्तं विधेयं सर्व्वकर्म्मसु ॥’*॥
प्रतिष्ठानन्तरं मात्स्ये ।
‘ततः सहस्रं विप्राणामष्टोत्तरशतन्तथा ।
भोजयेच्च यथाशक्त्या पञ्चाशद्वाथ विंशतिम् ॥’
षोड़शोपचाराः आसनमित्यादि । दशोपचाराः पाद्यादि । पञ्चोपचारा गन्धादि ।
‘सर्व्वोपचारवस्तूनामलाभे भावनैव हि ।
निर्म्मलेनोदकेनानुपूर्णतेत्याह नारदः ॥’ * ॥
नारसिंहे ।
‘स्नाने वस्त्रे च नैवेद्ये दद्यादाचमनीयकम् ॥’
कालिकापुराणम् ।
‘यद्दीयते च देवेभ्यो गन्धपुष्पादिकं तथा ।
अर्घ्यपात्रस्थितैस्तोयैरभिषिच्य तदुत्सृजेत् ॥’
देवीपुराणम् ।
‘होमो ग्रहादिपूजायां शतमष्टोत्तरं भवेत् ।
अष्टाविंशतिरष्टौ वा यथाशक्ति विधीयते ॥’
कात्यायनः ।
‘आज्यं द्रव्यमनादेशे जुहोतिषु विधीयते ॥’
अत्र नीराजनमाह पूजारत्नाकरे देवीपुराणम् ।
‘शङ्खभेर्य्यादिनिनदैर्जयशब्दैश्च पुष्कलैः ।
यावतो दिवसान् वीर ! देव्या नीराजनं कृतम् ।
तावत्कल्पसहस्राणि स्वर्गलोके महीयते ॥
भक्त्या पिष्टप्रदीपाद्यैश्चूताश्वत्थादिपल्लवैः ।
ओषधीभिश्च मेध्याभिः सर्व्वबीजैर्यवादिभिः ॥
नवम्यां पर्व्वकालेषु यात्राकाले विशेषतः ।
यः कुर्य्याच्छ्रद्धया वीर ! देव्या नीराजनं नरः ।
यस्तु कुर्य्यात् प्रदीपेन सूर्य्यलोकं स गच्छति ॥’
पर्व्वकाल उत्सवकालः । देव्या इति स्त्रीत्वमविवक्षितं बहुशो निबन्धकारैर्व्याख्यातत्वात् आचाराच्च ॥*॥ अथ प्रतिष्ठितमूर्त्तौ कदाचित् पूजाभावेन महाकपिलपञ्चरात्रम् ।
‘एकाहपूजाविहतौ कुर्य्याद्द्विगुणमर्च्चनम् ।
त्रिरात्रे च महापूजा संप्रोक्षणमतः परम् ॥
मासादूर्द्ध्वमनेकाहपूजा यदि विहन्यते ।
प्रतिष्ठैवेष्यते केचित् केचित् संप्रोक्षणक्रमः ॥’
संप्रोक्षणं ॐ देवस्य त्वेत्यादिना ।
‘गवां रसैश्च संस्नाप्य दर्भतोयैर्विशोध्य च ।
प्रोक्षयेत् प्रोक्षणीतोयैर्मूलेनाष्टोत्तरं शतम् ॥
सपुष्पं सकुशं पाणिं न्यसेद्देवस्य मस्तके ।
पञ्चवारं जपेन्मूलमष्टोत्तरशतोत्तरम् ॥
ततो मूलेन मूर्द्धादिपीठान्तं संस्पृशेदिति ।
तत्त्वन्यासं लिपिन्यासं मन्त्रन्यासञ्च विन्यसेत् ॥
प्राणप्रतिष्ठामन्त्रेण प्राणस्थापनमाचरेत् ।
पूजाञ्च महतीं कुर्य्यात् स्वतन्त्रोक्तां यथाविधि ।
यागहोमादिषु प्रायः संक्षेपोऽयं विधिः स्मृतः ॥’
अस्पृश्यस्पर्शने तु बौधायनः । तासां द्रव्यवत् कृतशौचानां देवार्च्चानां भूयः प्रतिष्ठापयेत् । तासामस्पृश्यस्पर्शानाम् । प्रकृतिद्रव्यस्य ताम्रादेर्यथेष्टशौचं कृत्वा पुनः प्रतिष्ठां कारयेदिति रत्नाकरः । तदा पूज्यत्वमित्याहू रत्नाकरादयः ॥*॥ आदित्यपुराणे ।
‘खण्डिते स्फुटिते दग्धे भ्राजमानविवर्ज्जिते ।
योगहीने पशुस्पृष्टे पतिते दुष्टभूमिषु ॥
अन्यमन्त्रार्च्चिते चैव पतितस्पर्शदूषिते ।
दशस्वेतेषु नो चक्रुः सन्निधानं दिवौकसः ॥
इति सर्व्वगतो विष्णुः परिभाषाञ्चकार ह ॥’
उपचारद्रव्याणि सारदातिलके ।
‘पाद्यं श्यामाकदूर्व्वाब्जविष्णुक्रान्ताभिरिष्यते ।’
तद्युक्तजलमिति शेषः ।
‘गन्धपुष्पाक्षतयवकुशाग्रतिलसर्षपैः ।
सदूर्व्वैः सर्व्वदेवानामर्घ्यमेतदुदीरितम् ॥
जातीलवङ्गकक्कोलैर्जलमाचमनीयकम् ।
आज्यं दधिमधून्मिश्रं मधुपर्कं निवेदयेत् ॥’
कात्यायनः ।
‘मधुपर्कं दधिमधुघृतसर्षपसहितं कांस्ये कांस्येन ।’
गन्धश्चन्दनकर्पूरकालागुरुभिरीरितः । पुष्पाणि देवदेयानि ।
‘गुग्गुल्गुरुशीरशर्करामधुचन्दनैः ।
धूपयेदाज्यसंमिश्रैर्नीचैर्देवस्य देशिकः ।
तत्र तत्र जलं दद्यादुपचारान्तरान्तरे ॥’
अत्र वृद्धिहोमौ त्वनावश्यकौ यथाशक्ति इत्यभिधानात् ॥*॥ तथा चाल्पधनानां यज्ञमण्डपेन विनापि पूजामाह विष्णुधर्म्मोत्तरप्रथमकाण्डम् ।
‘पूजा कार्य्या बहिर्वेद्यां श्रद्धया भृगुनन्दन ! ।
न त्वल्पदक्षिणैर्यज्ञैर्यजेदिह कदाचन ॥
विष्णुं देवनिकायस्थं यथाश्रद्धमरिन्दम ! ।
तपसा पूजयेन्नित्यं तस्मादल्पधनो नरः ॥”*॥
यद्येकाहे देवप्रतिष्ठावास्तुयागग्रहोत्सर्गास्तदा तन्त्रेण वृद्धिश्राद्धं कुर्य्यात् । गणशः क्रियमाणेष्विति वचनात् ॥*॥ तथा एकस्मिन्नपि अग्नौ होमद्वयं विधेयम् । एकाग्नावनेकहोमकरणपक्षे तन्त्रेण परिसमूहनादिकमाह गोभिलः । गणेष्वेकं परिसमूहनमिध्मो बर्हिःपर्य्युक्षणमाज्यभागाविति ॥*॥ पूजादिकन्तु प्रत्येकमेव । ब्रह्मपुराणे ।
‘देवानां प्रतिमा यत्र घृताभ्यङ्गक्षमा भवेत् ।
पलानि तस्यै देयानि श्रद्धया पञ्चविंशतिः ॥
अष्टोत्तरशतपलं स्नाने देयञ्च सर्व्वदा ॥’
नारसिंहे ।
यवगोधूमजैश्चूर्णैरुद्वर्त्त्योष्णेन वारिणा ।
प्रक्षाल्य देवदेवेशं वारुणं लोकमाप्नुयात् ॥